
आंग्लान् सम्मुखीकृतवन्तः धीराः

८

राज्ञी चेन्नम्मा

◆ रचना - मीरा उग्रा
◆ चित्रम् - गौतमसेनः

दक्षिणभारते स्थितं कित्तूरुराज्यं यद्यपि लघु, तथापि सुसमृद्धम् आसीत् ।



तस्य राजा शिवलिङ्गरुद्रसर्जः १८२६ तमे वर्षे दिवंगतः । मरणसमये सः दत्तकपुत्रं चेन्नम्मायाः हस्ते समर्पितवान् ।



धारवाडनिवासी आङ्ग्लराजकीयप्रतिनिधिः थ्याकरेवर्यः दत्तकपुत्रस्य सिंहासनारोहणे असम्मातिं दर्शितवान् ।



अल्पकालानन्तरम् -





उभयपक्षयोः अपि युद्धसन्नाहः प्रवृत्तः । अक्टोबर्-मासस्य २३ तमे दिनाङ्के थ्याकरे ससैन्यम् आगतः ।

दुर्गस्य द्वारम् उद्घाट्यताम् !

अन्तः आगमानार्थम् अवकाशः न दातव्यः इत्येषा चेन्नम्मायाः आज्ञा !

भवन्तः राज्ञीं वदन्तु यत् २० निमेषाभ्यन्तरे द्वारं न उद्घाटितं चेत् गोलकास्त्र-प्रयोगः करिष्यते इति

सर्वे सकुतूहलं राज्ञ्याः उत्तरं प्रतीक्षमाणाः आसन् । २० निमेषाः समाप्तप्रायाः । तावता ।....

आक्रम्यताम्

युध्यताम्

अकस्मात् प्रवृत्तात् आक्रमणात् आंग्लाः दिग्भ्रान्ताः ।

एते दुष्टाः....

हन्त !

आंग्लानां सैन्यं धूलिसात् जातम् । तीव्रं व्रणितवत्सु थ्याकरे अपि अन्यतमः आसीत् ।

चेन्नम्मा जानाति स्म यत् पुनः अपि आक्रमणं भविष्यति एव इति ।

सैन्ये बहवः प्रवेशनीयाः । साहाय्यार्थं कोल्हापुरराजाय सन्देशः प्रेषणीयः ।

सन्देशवाहकान् दूतान् कोल्हापुरमार्गे आंग्लाः गृहीतवन्तः ।

किन्तु प्रजाः राज्ञ्याः समर्थने समुत्सुकाः आसन् ।

महाराज्ञि ! तरुणाः वृद्धाः इत्यादयः सर्वे युद्धार्थम् आगच्छन्तः सन्ति ।

एषः रायण्णः, सङ्गोळिळ ग्रामस्य ग्रामाधिकारी ।

स्वागतं रायण्णाय । भवदृशाः एव इदानीम् अपेक्षिताः ।

डिसेम्बरप्रथमे जनरल् मैक्लोयड् २५००० सैनिकैः, भुषुण्डिभिः च सह आगत्य दुर्गम् आक्रान्तवान् ।

दुर्गं सबलम् । सैनिकाः च धीराः । तथापि न चिन्ता । दुर्गस्थः कोऽपि अस्माकं साहाय्यं कुर्यात् ।

दिनद्वयस्य अनन्तरम् आंग्लेयाः गोलकास्त्र-प्रयोगम् आरब्धवन्तः ।

B O O M !

प्रतिक्रियारूपेण चेन्नम्मायाः सैनिकाः अस्त्रप्रयोगं कर्तुं न शक्तवन्तः ।

विश्वासघातुकः कोऽपि सर्वनाशं कृतवान् अस्ति ।

चतुर्थे दिनाङ्के सायं स्पष्टतया ज्ञातं यत् दुर्ग-रक्षणम् इतःपरम् असाध्यम् इति ।

आंग्लसैनिकाः यदाकदापि आगन्तुम् अर्हन्ति महाराज्ञि ! भवती आत्मरक्षणं करोतु ।

किन्तु

स्थीयताम्

राज्ञी चेन्नम्मा शत्रुभिः गृहीता ।

4

राज्ञी आंग्लेयानां बन्धनात् मुक्तिः प्राप्तुं न शक्तवती। सङ्गोळिळ-रायण्णेन नेतृत्वं वोढव्यम् अभवत् । अचिरात् एव रायण्णः आंग्लानां भीतिहेतुकः जातः ।

(समाप्तम्)

THE END

राजा अपि विनम्रः स्यात्

चित्रम् - शङ्कर ली

बुद्धिमान् न्यायानिष्ठः कश्चन राजा कदाचित् मृगयार्थम् अरण्यं गतवान् ।

... सः परिवारतः कथमपि पृथग्भूतः जातः । एकाकी सः अग्रे गतवान् ।

कियत्कालं तेषाम् अन्वेषणं कुर्याम् श्रान्तः अस्मि । किञ्चित् विश्रान्तिं स्वीकरोमि ।

सः एकम् आश्रम प्राप्य अश्वात् अवतीर्य मुनेः पुरतः स्थितवान् ।

उपस्थितः कः इति ध्यानावस्थायाम् एव जानन् अपि मुनिः नेत्रे उन्मीलितवान् ।

स्वागतम् । आस्यताम् । फलम् आस्वाद्यताम् । अस्माकं राजा बुद्धिमान् न्यायनिष्ठः च अस्ति । अतः यत् खाद्यते तत् मधुरम् एव भवति ।

राजा स्वस्य प्रशसा श्रुत्वा लज्जितः । सः खादनार्थं कानिचन फलानि पत्राणि च आनीतवान् ।

अहो, सर्वाणि मधुराणि ! कारवेल्लम् अपि मधुरायते ! ऋषिणा उक्तं सत्यम् ।

मुनये धन्यवादान् समर्प्य राजा राजधानीं प्रतिगतः ।

अहो, मम अनुयायिनः मिलिताः ।

अस्माकं महाराजः मिलितः ।

स्वागतं ते

राजप्रासादं प्रत्यागतस्य राज्ञः मनसि दुरभिमानः उत्पन्नः ।

यथा मुनिः मम योग्यतां ज्ञातवान् तथा प्रजाः अपि जानन्तु नाम ।

राजा भोजोत्सवं व्यवस्थापयितुम् इच्छन् पर्यवेक्षकम् आहूतवान् ।

भोजोत्सवस्य व्यवस्था भवतु । कारवेल्लस्य व्यञ्जनं कारयतु । निम्बपत्रस्य क्वथितं भवतु ।

यथाज्ञापयति महाराजः ।

अतिथयः परिवारजनाश्च राज्ञः भोजनारम्भं प्रतीक्षन्ते ।

हन्त ! एतत् तु नितरां तिक्तम् ।

राजा स्वस्य निराशां गोपयितुं प्रयत्नं करोति पर्यवेक्षकम् आहूय किमपि वदति सः ।

एतानि सर्वाणि नयतु । सामान्यभोज्यानि आनयतु

अतिथीनां निर्गमनस्य अनन्तरं राजा अरण्यं गत्वा मुनिं भोजोत्सवस्य अनुभवम् अवदत् ।

कारवेल्लं निम्बं च आश्रमे मधुरम् आसीत् । प्रासादे च तिक्तम् ।

राजन् ! यदा अत्र आगतं तदा भवति नम्रता आसीत् । मम प्रशंसायाः श्रवणात् भवति मिथ्याभिमानः उत्पन्नः । विनम्रता च नष्टा । अतः सर्वाणि-वस्तूनि तिक्तताम् अदर्शयन् ।

राजा लज्जितः जातः । राजा अपि विनम्रः स्यात् इति अवगतं तेन ।

परोपकारी समीरः

चन्दमामायाः प्रस्तुतिः

चित्रम् - पाणिः

रामपुरीयाः चोरभयात् पिशाच-भयात् च त्रस्ताः आसन् ।

जनानां भावना आसीत् यत् प्राचीनस्य राजभवनस्य शिथिलभागेषु भूत-पिशाचादयः वसन्ति इति । लुण्ठाकेभ्यः अपि ते भीताः आसन् । ते चोराः हठात् आक्रमणेन ग्रामीणान् लुण्ठयन्ति स्म । एतस्मिन् एव काले समीरः नाम युवकः स्वस्य शुर-नामकेन शुनकेन सह तं ग्रामम् आगत्य पिशाचावासभूते प्राचीनराज-भवने वासम् आरब्धवान् ।

सः ग्रामप्रमुख-समीपं गत्वा उक्तवान् - "भवद्भिः भूतपिशाचादिभ्यः भेतव्यं नास्ति । यतः तेभ्यः भवतां सर्वेषां रक्षणम् अहं करिष्यामि । एतं विषयं सर्वान् वदतु भवान्" इति ।

शृण्वन्तु, सर्वे शृण्वन्तु । अन्धकारप्रसारानन्तरं कोऽपि गृहात् बहिः न आगच्छेत् । समीरः रात्रौ रक्षणं करिष्यति । चोरान् च ग्रहीष्यति ।

समीरः रात्रौ रक्षणकार्यं करोति स्म । रात्रौ ये मार्गे दृश्यन्ते स्म तान् गृहीत्वा भूतावासे बन्धने स्थापयति स्म । प्रातः तान् बन्धमुक्तान् करोति स्म ।

अल्पे एव काले पिशाचभयम् अपगतम् । किन्तु केचन ग्रामवासिनः ग्रामाधिकारिणः पुरतः समीरव्यवहारे दोषम् आरोपितवन्तः ।

किं भवान् सर्वान् सन्देहेन पश्यन् भूतावासे बन्धने स्थापयति ?


आम् । तत्र वासतः जनाः जानन्ति यत् भूत-प्रेतादयः न सन्ति इति । एतस्मात् चोरभयम् अपि दूरं गच्छति ।

अल्पे एव काले चोरभयम् अपि अपगतम् । ग्रामाधिकारी समीरस्य प्रशंसां कृत्वा सम्माननं कृतवान् ।

बलरामं लुण्ठाकः कश्चन लुण्ठितवान् अस्ति ।

भवान् सामान्य-चोरेभ्यः अस्मान् रक्षितवान् । किन्तु महालुण्ठाकेभ्यः वयं पीड्यमानाः स्मः । ततः किम् अस्मान् रक्षेत् भवान् ?

बलरामस्य पिता मरणसमये उक्तवान् आसीत् - ''धनिकात् किशोरात् ऋण-रूपेण स्वीकृतानि चतुस्सहस्रं रूप्यकाणि मया प्रत्यर्पितानि । किन्तु तेन ऋणपत्रं न प्रत्यर्पितम् । ततः तत् अवश्यं प्रतिप्राप्तव्यं भवता'' इति ।


पितुः वचनस्य अनुगुणं बलरामः धनिकसमीपं गत्वा ऋण-पत्रप्रत्यर्पणं प्रार्थितवान् । धनिकः तत् निराकृत्य बलरामस्य गृहं स्वायत्तीकृतवान् ।
यदि एतत् सत्यं तर्हि अहं यथायोग्यं करिष्यामि ।
रात्रौ रक्षण-समये समीरः धनिकस्य गृहस्य भित्तौ महारन्ध्रं निर्मितवान् ।
अनन्तरदिने सः ग्रामाधिकारिणः समीपं गतवान् । धनिकम् अपि तत्र आनायितवान् ।
चोरेभ्यः रक्षयिष्यामि इति भवता उच्यते । किन्तु ह्यः रात्रौ कश्चन चोरः मम गृहस्य भित्तौ महा-रन्ध्रं निर्मितवान् अस्ति ।
एतत् भूतानां कार्यं स्यात्, तु चोरस्य
पिशाचानां कार्यं स्यात् इति केन आधारेण वदति भवान् ?
भूतानाम् आवासे एव खलु अहं वसामि ? हाम्, अन्यः कश्चन विषयः । गोपीनाथस्य पिशाचः भवतः मेलितुम् इच्छति ।


अहं तु तेन पिशाचेन न मेलिष्यामि । सः एव मम गृहस्य भित्तौ महारन्ध्रं कृतवान् स्यात् ।
पिशाचेन मेलितुं प्राप्तः अयम् अवसरः न त्यक्तव्यः भवता ।
तस्य नाम्नः श्रवणात् एव मम शरीरं कम्पते !
किमर्थं भीतिः ? किं सः भवद्विषये कुपितः ?
आम् । सः मत्तः ऋण स्वीकृतवान् । प्रत्यर्पितवान् च । किन्तु मया ऋणपत्रं न प्रत्यर्पितम् । तत्पुत्रस्य गृहम् अपि मया स्वायत्तीकृतम् । अतः सः प्रतीकारं साधयितुं प्रयतमानः स्यात् ।
एवं तर्हि भवान् बलरामाय तदीयं गृहं प्रत्यर्पयतु । सहस्रं रूप्यकाणि अपि ददातु । पिशाचम् अहं बोधयिष्यामि ।
धनिकः अधिकारिणः द्वारा ऋणपत्रं अपि प्रत्यर्पितवान् । सहस्रं रूप्यकाणि अपि दत्तवान् ।
अनन्तरदिने समीरः स्व-शुनकेन सह अन्यग्रामं प्रति प्रस्थितवान् ।

चन्दमामायाः प्रस्तुतिः

परोपकारी समीरः

चित्रम् - पाणिः

कपटसंन्यासिनः निग्रहणम्

समीरः शुनकेन सह गत्वा गङ्गापुरं यावत् प्राप्तवान् तावता अन्धकारः प्रसृतः आसीत् । मार्गेषु नीरवता आसीत् । सर्वे द्वारं पिधाय सुप्तवन्तः आसन् । समीरः तु पिपासितः । जलार्थं सः गृहस्य द्वारं ताडितवान् । तावता अन्तर्भागतः साभाषणध्वनिः श्रुतः ।

तस्मै अभासत यत् जनाः भयग्रस्ताः सन्ति इति । सः ग्रामदेवता-मन्दिरं प्रति प्रस्थितवान् ।

गमनसमये सः अन्यस्य गृहस्य अन्तः दृष्टिं प्रसारितवान् । तत्र कम्बलेन आच्छाद्य उपविश्य द्वौ वार्तालापं कुर्वन्तौ आस्ताम् ।

यदा द्वारशब्दं कृत्वा समीरः जलदानं प्रार्थितवान् तदा तौ शयनाभिनयं कृतवन्तौ ।

तत्र त्रयः सुरां पिबन्तः किमपि खादन्तः आसन् ।

पिपासितः अस्मि । जलं दीयताम् ।

कः भवान् ? कश्चित् अपृच्छत् ।

मत्समीपे एतावत् एव जलम् अस्ति । एतदेव पिबतु ।


जलं पीत्वा गतः समीरः एकत्र सुप्तवान् प्रातः उत्थितः सः कुत्रचित् गच्छतः ग्रामीणान् अपश्यत् । तेन पृष्टाः जनाः अवदन् - ''वयं कस्यचित् संन्यासिनः दर्शनार्थं गच्छन्तः स्मः ....''
''ग्रामे चौर्यम् आधिक्येन प्रचलत् अस्ति । चौर्यस्य अवरोधार्थं वयं संन्यासिनं प्रार्थयिष्यामः । सः अस्मान् रक्षिष्यति ।'' संन्यासिविषये सन्देहगन्धः आघ्रातः समीरेण । अतः सः तान् अनुसृतवान् ।
''जय शाम्भवि ! वत्स ! किम् इच्छति भवान् ?''
सः अवदत् - ''विवाहेच्छा मम''
संन्यासिनं शिष्यः कश्चन किमपि अवदत् ।
भवतः इच्छा पूर्णा भविष्यति । विवाहम् अहं निर्वर्तयिष्यामि
अनुगृहीतोऽस्मि ।

''भक्ताः ! अहं चौर्यविषये देवताभिः सह वार्तालापं कृतवान् । ताः चोरेभ्यः भवतः सर्वान् रक्षिष्यन्ति । अग्रिमशुक्रवासराभ्यन्तरे तासाम् अनुग्रहः भविष्यति । निश्चिन्ताः सन्तः प्रतिगच्छन्तु भवन्तः'' इति अवदत् संन्यासी । जनाः संन्यासिनः आश्वासनं प्राप्य निश्चिन्ततया प्रतिगताः । समीरः गभीरचिन्तने निमग्नः ।

सर्वेषां निर्गमनस्य अनन्तरं समीरस्य बुद्धिः वेगेन कार्यम् अकरोत् ।

तस्यां रात्रौ सः शिलायाः कस्याश्चित् पृष्ठतः उपविश्य संन्यासिनः व्यवहारं परिशीलितवान् । दृढकायाः त्रयः चोरितवस्तूनां ग्रन्थिम् उन्नीय संन्यासिनः समीपम् आगच्छन्तः तेन दृष्टाः ।

ते त्रयः ग्रन्थिस्थानि आभरणानि धनं च संन्यासिने दर्शितवन्तः ।

समीरः ततः ग्रामं गतवान् ।

''संन्यासिनः दर्शनार्थं हिमालयतः केचन महात्मानः आगच्छन्ति । तेषां वासादि-व्यवस्था करणीया । अतः भवन्तः कुद्दालखनित्रादीनि गृहीत्वा आगच्छन्तु ।''

कुद्दालखनित्रादीनि गृहीत्वा जनाः समीरम् अनुसरन्तः संन्यासिसमीपम् आगताः । एतत् दृष्ट्वा संन्यासी आश्चर्य-चकितः भीतः च ।

गुरुवर्य ! अद्य वयं गृहीताः !!

''भवतः पापघटः पूर्णः । भवन्तं सजीवं गर्ते स्थापयितुं सर्वे आयुध-सहितम् आगताः सन्ति ।''

किमर्थम् ? किं कृतं मया ?

''मुग्धान् ग्रामीणान् इतोऽप्यग्रे अपि वञ्चयितुं न अर्हति भवान्'' इति वदन् समीरः संन्यासिनः जटां श्मश्रु च आकृष्टवान् । संन्यासिनः वास्तविकं रूपं प्रकटितं जातम् ।

जनाः कपटसंन्यासिनं सम्यक् ताडितवन्तः । कपटसंन्यासितः प्राप्तानि आभरणानि तत्तत्स्वामिभ्यः दत्तवान् समीरः ।


कपटसंन्यासिनं तच्छिष्यान् च यथायोग्यं दण्डितान् कारयित्वा समीरः स्वशुनकेन सह अन्यग्रामं गतवान् ।

बुद्धिमान् बीरबलः



कदाचित् अकबरस्य आस्थानं प्रचलति स्म । कश्चन आस्थानिकः अग्रे आगत्य अकबरं त्रिवारं प्रणम्य - ''एतत् नूतनं सुगन्धद्रव्यम् इसफहानतः आनीतम् । महाराजः एतस्य उत्कृष्टताविषये स्वाभिप्रायं प्रकटयितुम् अर्हति'' इति उक्त्वा महाराजस्य हस्ते सुगन्धद्रव्यकूपीं स्थापितवान् ।

महाराजः कूपीम् उद्घाट्य दृष्टवान् । तस्य मुखे मन्दहासः उत्पन्नः । सः सभासदः उद्दिश्य - ''मया मिर्-शामसुद्दीनतः कूपी स्वीकृता यत् तत् सर्वैः दृष्टम् एव । भवत्सु कोऽपि किं वक्तुं शक्नुयात् यत् दातुः हस्तः अधः, स्वीकर्तुः हस्तः उपरि च कदा भवति इति ?'' इति उक्त्वा किञ्चित्कालं उत्तरं प्रतीक्षितवान् ।




'मया कूपीदानसमये किमपि अपराद्धं किम् ?' इति भीत्या राजानं दृष्टवान् शामसुद्दीनः । राज्ञः मुखं गम्भीरं लक्षितं तेन । यावत् सः किमपि वक्तुम् उद्युक्तः तावता राजा तम् अपृच्छत् - ''किं भवान् उत्तरं जानाति ?'' इति ।

सभासत्सु परस्परसम्भाषण-ध्वनिः उत्पन्नः । सभायाम् एतादृशानां प्रश्नानाम् उत्पादनं महाराजस्य स्वभावः आसीत् । अद्यतनः प्रश्नः कठिनः इव अभासत । शामसुद्दीनः विना वचनं आसने उपविष्टवान् ।





अपरः सभासत् उत्थितवान् । ''महाराज ! दातु : स्वीकर्तुः वा हस्तः उपरि अधः वा भवति चेदपि फलं तु समानम् एव'' इति उक्तवान् सः । महाराजस्य मुखे हासः उत्पन्नः । सभासदः अपि हसितवन्तः ।



अकबरः सभां परीक्षादृष्ट्या सकृत् दृष्ट्वा - ''भवत्सु कोऽपि मम प्रश्नस्य उत्तरं न जानाति । बीरबलः क्व ?'' इति अपृच्छत् । अकबरस्य प्रियः आस्थानिकः बीरबलः कुत्र अस्ति इति सर्वे इतस्ततः दृष्टवन्तः ।



''अहम् अत्र अस्मि महाराज !'' इति वदन् सभां प्रविष्टवान् बीरबलः । सर्वेषां दृष्टिः बीरबले संलग्ना । ''बीरबल ! प्रायः भवान् एव मम सन्देहं परिहर्तुं समर्थः'' इति उक्त्वा राजा स्वस्य प्रश्नं पुनः उच्चारितवान् ।




बीरबलः सभासदः आत्मविश्वासेन पश्यन् अकबरसमीपं गतवान् । स्वस्य नस्यपात्रम् उद्घाट्य महाराजस्य पुरतः गृहीतवान् च । महाराजः ततः किञ्चित् नस्यचूर्णं स्वीकृतवान् । तदा बीरबलः हसन् उक्तवान् - ''ज्ञातं खलु ? नस्य-चूर्णस्वीकारसमये दातुः हस्तः भवति अधः, स्वीकर्तुश्च उपरि'' इति ।

बुद्धिमान् रामकृष्णः



तेनालिरामकृष्णस्य नाम को वा न जानाति ? बालाः अपि जानन्ति । सः महाबुद्धिमान् चाटुनिपुणः च आसीत् । कृष्णदेवरायस्य आस्थाने तस्य वासः । सर्वदाऽपि महतीम् अपि समस्यां चातुर्यपूर्वक-व्यवहारेण परिहरति स्म सः ।


कदाचित् कृष्णदेवरायः रामकृष्णविषये केनचित् कारणेन नितरां कुपितः । सः केपेन अवदत् - ''निर्गच्छतु इतः । इतःपरं कदापि भवतः मुखं द्रष्टुम् न इच्छामि'' इति ।






रामकृष्णाय ये असूयन्ति स्म ते सर्वे एतं कोपप्रसङ्गं दृष्ट्वा नितरां सन्तुष्टाः । 'रामकृष्णः इतःपरं राजास्थाने स्थानं सर्वथा न अर्हति' इति चिन्तितवन्तः ते । तथापि तेषां सन्देहः - 'रामकृष्णः केनापि उपायेन पुनरपि राजसभां प्रविशेत्' इति ।

रामकृष्णस्य दृष्ट्या तु एषः कश्चन क्षुल्लकः प्रसङ्गः । सः प्रवृत्तस्य विषये न खिन्नः, न वा चिन्ताक्रान्तः । अनन्तरदिने सः यथापूर्वं राजास्थानम् आगतवान् । मध्येमार्गम् एकं घटं क्रीत्वा आनीतवान् आसीत् सः ।







रामकृष्णः यदा राजास्थानं प्राविष्टवान् तदा सर्वे तम् आश्चर्येण दृष्टवन्तः । 'राज्ञः कोपः इतोऽपि न उपशान्तः । अतः राजा रामकृष्णं राज्यात् निष्कासयेत् अपि' इति तेषां चिन्तनम् आसीत् ।



रामकृष्णः तु 'किमपि न प्रवृत्तम् एव' इति भावयन् घटेन मुखम् आच्छाद्य यथापूर्वं स्वस्य आसने उपविष्टवान् ।



'राजा किं वा कुर्यात् ?'
इति सर्वे प्रतीक्षमाणाः आसन् । राजा आस्थानं प्रविष्टवान् । सः रामकृष्णं दृष्ट्वा कोपेन एव अवदत् - ''भवता मुखं न प्रदर्शनीयम् इति खलु मया ह्यः आदिष्टम् ? तथापि किमर्थम् अत्र आगतं भवता ? किम् एतत् हास्यास्पदं मुखे घटधारणम् ?'' इति ।




तदा रामकृष्णः घटं धरन् एव शान्त-स्वरेण अवदत् - ''महाप्रभो ! क्षन्तव्यः अहम् । भवतः आज्ञा शिरसा धृता मया । मुखं न प्रदर्शनीयम् इति खलु भवतः आदेशः ? अतः घटेन आवृतं तत् । न आगन्तव्यम् इति तु भवता न आदिष्टम् । अतः आगतं मया'' इति । एतत् श्रुतवतः राज्ञः कोपः अपगतः ! तस्य मुखे हासः उत्पन्नः । रामकृष्णस्य अपायः निवृत्तः ।

बुद्धिमान् बीरबलः



चक्रवर्ती अक्बरः सिंहासने उपविश्य सकृत् परीक्षात्मक-दृष्टिं परितः प्रसार्य अपृच्छत् - ''पुष्पेषु श्रेष्ठं किम् ?'' इति । सभासदः एतं प्रश्नं श्रुत्वा परस्परं मुखं दृष्टवन्तः ।


एकः उत्थाय महाराजसमीपं गत्वा कूपीस्थस्य सुगन्धद्रव्यस्य एकं बिन्दुं स्वस्य हस्तस्य पृष्ठभागे पातयित्वा राज्ञः नासिकायाः पुरतः गृहीतवान् । ''पाटलपुष्पम् एव श्रेष्ठम् इति भवतः आशयः ननु ?'' इति राजा अपृच्छत् । सभासत् मन्दहासं प्रकटितवान् ।



राज्ञः मुखात् प्रतिवचनं यदा किमपि न निर्गतं तदा अपरः कश्चन उत्थाय स्वस्य दक्षिणहस्ते स्थितां मल्लिकामालां दर्शयन् अवदत् - ''मल्लिका एव पुष्पेषु श्रेष्ठा'' इति ।


राज्ञा अत्र सहमतिः न दर्शिता । तदा अपरः उत्थाय स्तम्भे उत्कीर्णं कमलं दर्शयन् - ''कमलानि एव पुष्पेषु श्रेष्ठानि । अतः एव तानि भवतः प्रियाणि'' इति अवदत् ।






राज्ञः मुखे तृप्तिः न दृष्टा । तदा अन्यः उत्थाय सिंहासनपार्श्वे स्थितं पुष्पगुच्छं दर्शयन् - ''एतानि एव श्रेष्ठानि । यतः एतानि राजोद्यानात् आनीतानि'' इति अवदत् ।

''पुष्पाणि सुगन्धीनि स्युः, श्वेतानि स्युः, सुन्दराणि वा स्युः । सुगन्धद्रव्ये उपयुक्तानि, मालारूपेण स्थितानि, स्तम्भे उत्कीर्णानि, पुष्पगुच्छे योजितानि वा स्युः । तथापि...'' इति उक्त्वा सः अपृच्छत् - ''बीरबलः क्वः ? किमर्थं मौनेन तिष्ठति सः ?'' इति ।



''अहम् अत्र अस्मि'' इति वदन् उत्थाय बीरबलः अवदत् - ''कार्पासपुष्पाणि एव श्रेष्ठानि'' इति । एतत् श्रुत्वा सर्वे आश्चर्यचकिताः । 'कथं कार्पासपुष्पाणां श्रेष्ठता ?' इति तैः न अवगतम् ।

''महाराज ! वयं यानि वस्त्राणि धरामः तानि कार्पासतः निर्मितानि । कार्पासस्य च कारणं कार्पासपुष्पम् एव । यत् जीवनोयोगि भवति तदेव श्रेष्ठम्'' इति अवदत् बीरबलः । सन्तुष्टः राजा कण्ठस्थं रत्नहारं निष्कास्य बीरबलस्य कण्ठे अर्पितवान् ।



बुद्धिमान् यदुमणिः



नवदशे शतके ओडिस्साराज्ये यदुमणिः नाम कविः आसीत् । तस्य पिता मुकुन्दः । सः श्रेष्ठः शिल्पी । तेन कदाचित् कृष्णमूर्तिः निर्मिता । 'एतां राधानाथमूर्तिं कुत्र स्थापयाम ?' इति पृष्टवान् यदुमणिः । 'वयम् एव मन्दिरं निर्माम' इति उक्तवान् मुकुन्दः ।




मुकुन्दः स्वस्य समग्रां सम्पत्तिं मन्दिरनिर्माणार्थं व्ययीकृतवान् । यदा सः दिवं गतः तदा तस्य उत्तरक्रियां निर्वर्तयितुम् अपि गृहे वराटिकामात्रम् अपि धनं न आसीत् । यदुमणिः अचिन्तयत् - 'इदानीं राजा एकः एव साहाय्यं कर्तुं शक्नुयात् । किन्तु राज्ञः सम्पर्कः कथं वा साधयितुं शक्यः ?' इति ।



स च सायङ्कालसमयः । देवस्थानस्य अर्चकः पूजां समाप्य द्वारस्य पिधानं कुर्वन् आसीत् । तावता यदुमणिः स्मृतवान् यत् राजा एतेन मार्गेण अद्य निर्गच्छति इति । अतः सः झटिति मन्दिरं गत्वा द्वारं हस्तेन ताडयन् उच्चैः अवदत् - ''भ्रात ! यदुनाथ ! उत्तिष्ठतु तावत्'' इति ।

तावता राज्ञः शिबिका तत्र आगता । मन्दिरस्य पिहितं द्वारं ताडयन्तं पुरुषं कञ्चित् दृष्ट्वा राजा कुतूहली जातः । सः शिबिकावाहकम् आज्ञापितवान् यत् तत्र किं प्रवर्तते इति ज्ञात्वा आगच्छतु इति ।






राजा शिबिकायाम् एव उपविष्टः । शिबिकावाहकः यदुमणिसमीपं गतवान् । 'राजा माम् आह्वयति किम् ?' इति वदन् तं शिबिकावाहकम् अनुसृतवान् यदुमणिः ।



शिबिकावाहकः प्रत्यगत्य राजानम् अवदत् - '' एषः कविः यदुमणिः । मुकुन्दस्य पुत्रः । मुकुन्दश्च राधानाथ-मूर्तेः निर्माता शिल्पी'' इति । ''तत्र भवान् किं कुर्वन् आसीत् ? भवान् उन्मत्तः तु न खलु ?'' इति पृष्टवान् राजा ।



यदुमणिः विनयेन अवनम्य अवदत् - ''महाराज ! राधानाथः मम अग्रजः । मम जन्मतः पूर्वं पिता तं निर्मितवान् । अतः सः अग्रजः मम । पितुः उत्तरक्रियायाः निर्वर्तनं ज्येष्ठपुत्रस्य कार्यं खलु ? अतः तम् अहम् उत्थापयन् अस्मि । किन्तु सः जागरितः न भवति'' इति ।



तदा राजा एकं नाणकग्रन्थिं तस्मै यच्छन् अवदत् - ''भवतः अग्रजः राधानाथः इदानीम् उत्थातुं न अर्हति । अतः एतेन धनेन पितुः उत्तरक्रियां निर्वर्तयतु यथाविधि । सर्वं समाप्य मम आस्थानम् आगच्छतु । दुःखकाले अपि महतीं बुद्धिमत्तां प्रदर्शयतः भवतः कौशलेन अहं नितरां सन्तुष्टः अस्मि'' इति ।

मुल्लुना कृतः प्रतीकारः



कथा - एम्. शङ्कर्राव्
विजयनगरम्

एकदा वनपुरे मुल्लुः प्रभाते उत्साहेन उत्थितवान् ।

उपाहारार्थं प्रतिदिनं गृञ्जनकानि एव भवन्ति स्म ।

प्रतिदिनं गृञ्जनकस्य खादनात् नीरसता मम ।

सः विविधरुचियुक्तम् आहारम् इच्छति स्म ।

उत्तमाहारस्य प्राप्त्यर्थं मया किं वा करणीम् ?

अहो उत्तमः पाकगन्धः !

भोलाभल्लुक्याः पाकशालातः निर्गतः पाकगन्धः तेन आघ्रातः ।

सः भोलाभल्लुक्याः गृहं प्रति धावितवान् ।

एवं गमनसमये फीतिश्रृगालेन सः घट्टितः जातः

माम् एव पीडयतः भवतः कियत् धाष्ट्यम् ! खादिष्यामि भवन्तम् !!

कुपितः फीतिः दन्तान् कटकटायमानः क्रोधेन मुल्लुम् अपश्यत् ।

भीतः मुल्लुः फीतिश्रृगालं क्षमां प्रार्थितवान् ।

भवन्तं भर्जयित्वा खादामि उत एवमेव ?

मुल्लोः खादनं करणीयम् एव इति निश्चितवान् आसीत् फीतिः ।

फीतिं वञ्चयितुम् उपायः प्राप्तः मुल्लुना ।


यथा इच्छति तथा मां खादितुम् अर्हति भवान् । यदि जीवेयं तर्हि भवतः उपकारं कुर्याम् ।


प्रतिदिनं शशानाम् एव खादनात् किम् अरुचिः न जाता भवतः ?
कुतः भवता भोलया सज्जीकृतः पाकः न सेवनीयः ?


युक्तम् एतत् । नूतनस्य रुचिकरस्य आहारस्य सेवनं ममापि सम्मतम् एव ।


किन्तु भोलया कृतस्य पाकस्य प्राप्तिः कथम् ?


एतदर्थं मुल्लोः उपायः सिद्धः एव आसीत् ।
तदर्थं मया मार्गः चिन्तितः अस्ति । मया यथा उच्यते तथा आचरतु । तदा भोलया कृतः पाकः प्राप्यते ।


मुल्लुः फीतिः च वैद्यस्य भोलस्य गृहं गतवन्तौ । ततः फीतिः भूमौ पतित्वा वेदनाम् अभिनीतवान् ।


मुल्लुः वैद्यं भोलं साहाय्यार्थम् आनीतवान् ।
वैद्यवर्य ! मम सुहृत् अस्वस्थः । साहाय्यं करोतु कृपया
मम गृहम् आनयतु । अहम् औषधं दास्यामि ।


एतत् तु उत्तमम् ।
फीतिः वैद्यस्य भोलस्य गृहे दोलामञ्चे सुखेन शयितवान् । मुल्लुः तस्य रक्षकः आसीत् ।


भोला भोजनं सज्जीकुर्वती आसीत् । मुल्लोः फीतेः च महान् आनन्दः ।


किञ्चित्कालानन्तरं भोलः भोला च विहारार्थं प्रस्थितवन्तौ ।
एषः युक्तः समयः ।


अहो, रुचिकरम्
फीतिः पाकशालां प्रविश्य सर्वं सुखेन अखादत् ।


यदा मुल्लुः तत्र आगतः तदा फीतिः तृप्त्या उद्गिरणं करोति स्म ।
GRRR
रे वराक, अपसरतु इतः ।

फीतिः भोजनस्य अनन्तरम् उच्चैः उद्गिरणम् अकरोत् ।

BRR!

फीतेः स्वार्थचिन्तन दृष्ट्वा मुल्लुः क्रुद्धः । प्रतीकार-बुद्धिः तस्मिन् उत्पन्ना ।

भवता एतस्य फलं प्राप्यते

भवतु

फीतिना मुल्लुम् उपेक्ष्य दोलामञ्चे शयनं कृतम् । मुल्लुः प्रतीकारोपायम् अचिन्तयत् ।

वराक ! सर्वं खादितं खलु भवता ।

सः पाकशाला गत्वा कानिचन मीनास्थीनि सङ्गृहीतवान् ।

सः तानि दोलामञ्चपर्यन्तं तत्र तत्र पातितवान् ।

फीतिः तु शयानः सशब्दं निद्रां करोति स्म ।

अग्रिमं परिणामम् अहं निरीक्षिष्ये ।

मम बुभुक्षा

गृहं गत्वा भोजनं करवाव ।

अल्पकालस्य विहारस्य अनन्तरं वैद्यः भोलः तत्पत्नी च प्रत्यागतौ ।

पाकपात्राणि सर्वाणि रिक्तानि लक्षितानि तया ।

केन खादितं स्यात् एतत्

तया दोलामञ्च-पर्यन्तं मीनास्थीनि लक्षितानि ।

मया ज्ञातम्

डा० भोलः तत्पत्नी च निश्शब्दं गत्वा फीतिं सम्यक् प्रहृतवन्तौ

योग्यः सत्कारः प्राप्तः भवता वराक !

अहो वेदना ! मया वस्तुतः वैद्यः दृष्टव्यः एव ।

वञ्चना सदा हानिकारिका

समाप्ता ।

बुद्धिमान् गोपालबन्धुः



गोपालबन्धुः राज्ञः कृष्णचन्द्रस्य आस्थाने विदूषकः आसीत् । कदाचित् म्लानमुखः राजा तेन लक्षितः । कारणं पृष्टः राजा अवदत् - ''नवाबः मम खेदस्य कारणम् ।'' ''समस्यां मां वदतु । ताम् अहं परिहरिष्यामि'' इति अवदत् गोपालः ।




''भूमेः दैर्घ्यं मातव्यम्, आकाशस्थानि नक्षत्राणि च गणनीयानि इति नवाबः माम् आदिष्टवान् अस्ति'' इति अवदत् राजा । ''एतदुभयम् अपि असाध्यं न । एतदर्थं लक्षं रूप्यकाणि वर्षात्मकं कालावधिं च याचतु'' इति असूचयत् गोपालः ।




राजा नवाबस्य पुरतः स्वस्य अपेक्षाम् उपस्थापितवान् । ''लक्षं रूप्यकाणि तु दीयन्ते । वर्षात्मकः कालावधिः किमर्थम् ?'' - नवाबः अपृच्छत् । ''भूमेः मापनं तु अहोरात्रं कर्तुं शक्यते । किन्तु नक्षत्राणि रात्रौ एव गणनीयानि खलु ? तदर्थं तावान् अवधिः आवश्यकः'' - राजा अवदत् ।



राजा लक्षं रूप्यकाणि गोपालाय दत्त्वा पृष्टवान् - ''वस्तुतः अपि वर्षाभ्यन्तरे तत् कार्यं करिष्यते खलु भवता ?'' इति । ''भवान् चिन्तां मा करोतु । वर्षानन्तरम् अहम् आगमिष्यामि'' इति उक्त्वा ततः निर्गतवान् गोपालः ।




एकं वर्षम् आनन्देन यापितवान् सः । जनाः तं पृच्छन्ति स्म - ''राजास्थानं प्रति गमनं नास्ति किम् ?'' इति । गोपालः वदति स्म - ''राजा मह्यं विशेषकार्यं दत्तवान् अस्ति । तस्य समाप्तिपर्यन्तं मया आस्थानं प्रति गन्तव्यं नास्ति'' इति ।



वर्षावधिः यदा समाप्तः तदा गोपालः राजानं दृष्टवान्, ''कार्यं समाप्तं महाराज'' इति उक्तवान् च । ''किं भूमेः दैर्घ्यं दृष्टम् ? किं नक्षत्राणि गणितानि ?'' राजा अपृच्छत् । ''आम् ! श्वः नवाबसमीपं गच्छाव'' इति उक्तवान् गोपालः ।



अनन्तरदिने राजा नवाबस्य आस्थानं प्रति प्रस्थितः । गोपालः तम् अनुसृतवान् । दशशकटमितानि जालानि अपि नीतानि । दश मेषाश्च नीताः ।



''एषः गोपालः मत्प्रतिनिधित्वेन भवदुक्तं कार्यं कृतवान्'' इति नवाबम् उक्तवान् राजा । ''अस्तु, गणनां वदतु'' इति उक्तवान् नवाबः । ''जालानां रज्जुः यावद्दीर्घा तावदेव दैर्घ्यं भूमेः । मेषाणां शरीरे यावन्ति रोमाणि तावन्ति एव नक्षत्राणि लोके'' इति अवदत् गोपालः । नवाबः राजा च एतत् श्रुत्वा आश्चर्येण स्तब्धौ ।

बुद्धिमान् तेनालिरामः



कदाचित् विजयनगराधिपस्य कृष्णदेवरायस्य आस्थानं प्रचलति स्म । तदा उभौ सेवकौ पार्श्वद्वये गृहीत्वा किञ्चन चित्रम् आनीय सभासद्भ्यः दर्शितवन्तौ । राज्ञः एव चित्रं तत् । राजा तत् दृष्ट्वा प्रतिगत्य सिंहासने उपविष्टवान् ।




सभासदां मुखतः 'अहा' 'अहो' इत्यादीनि वचनानि निर्गतानि । ''सहस्रं सुवर्णनाणकानि मया कलाकाराय दत्तानि एतदर्थम्'' इति अवदत् राजा । ''चित्रस्य विषये भवताम् अभिप्रायः कः ?'' इति सभासदः अपृच्छत् सः ।




तदा कश्चन सभासत् उत्थाय - ''महाराज ! एतत् तु अपूर्वम् ! भवन्तं यथावत् चित्रितवान् अस्ति कलाकारः । सूक्ष्माः अंशाः अपि तेन चित्रिताः । केन एतत् चित्रितम् ?'' इति अपृच्छत् ।

राजा किमपि न उत्तरं न दत्तवान् । 'अहो अपूर्वम्' 'राज्ञः यथावत् चित्रम्' इत्यादीनि वचनानि सभायां श्रुतानि । तथापि राजा न सन्तुष्टः । ''रामकृष्ण ! चित्रस्य विषये भवतः अभिप्रायः कः ?'' इति तेनालिरामकृष्णम् अपृच्छत् राजा ।






''एतत् तु अपूर्वम् इव एव भाति । किन्तु भवतः अपरः भागः न दृश्यते अत्र'' इति अवदत् रामकृष्णः । ''यदा चित्रं दृश्यते तदा बहवः अंशाः ऊहनीयाः भवन्ति । एतदपि किं न ज्ञायते भवता ? भवान् एव एकं चित्रं चित्रयतु तावत्'' इति अवदत् राजा ।



मासानन्तरं राजा सभायाम् अपृच्छत् - ''रामकृष्णः क्व ? किं सः इदानीम् अपि चित्रं लिखन् एव अस्ति ?'' इति । ''अस्मासु केनापि सः चित्रं लिखन् न दृष्टः'' इति अवदत् कश्चित् । ''किं सः कूर्चं ग्रहीतुं वा शक्नुयात् ?'' इति अपरः उपहासपूर्वकम् अपृच्छत् । तावता रामकृष्णः मन्दहासपूर्वकम् सेवकाभ्यां सह सभां प्रविष्टवान् ।



''किं मम चित्रं प्रदर्शयितुम् अनुज्ञा अस्ति ?'' इति राजानम् अपृच्छत् रामकृष्णः । राजा शिरः अचालयत् । सेवकौ चित्रस्य आवरणम् अपनीतवन्तौ । सभासदः कण्ठं दीर्घीकृत्य चित्रं दृष्टवन्तः । ''किम् एतत् ? अत्र अश्वस्य पुच्छमात्रं दृश्यते !'' इति अवदत् राजा ।




तदा रामकृष्णः अवदत् - ''अवशिष्टं सर्वं भवता ऊहनीयं महाराज ! तृणानि खादित्वा अश्वः अग्रे गतः अस्ति । अतः अश्वस्य पुच्छेतरशरीरभागः चित्रात् बहिः अस्ति ।''

बुद्धिमान् गोपालबन्धुः



गोपालबन्धोः पितुः प्रथमं वार्षिकश्राद्धम् आसीत् तत् । अतः तेन सुदूरम् अतिक्रम्य नौकया च नदीं तीर्त्वा पुरोहितस्य गृहं प्राप्तव्यम् आसीत् । ''नौकां वेगेन चालयतु । मया मुहूर्तस्य अतिक्रमणात् पूर्वम् एव श्राद्धं करणीयम् अस्ति'' इति वदन् सः नौका-चालकं प्रेरितवान् ।



पुरोहितः मन्त्रान् उक्तवान् । गोपालः प्रेतात्मनः सद्गत्यर्थं विविधाः क्रियाः कृतवान् । एतदवसरे एव पुरोहितः मन्त्रकथनं स्थगयित्वा उक्तवान् - ''भवतः पिता मत्तः शतं रूप्यकाणि स्वीकृतवान् आसीत् । तत् इदानीं प्रत्यर्पयतु । अन्यथा श्राद्धक्रिया समाप्तिं न एष्यति'' इति ।




मुहूर्तसमाप्तितः पूर्वम् एव श्राद्धं तु समापनीयम् आसीत् एव । अतः गोपालबन्धुः उक्तवान् - ''श्रीमन् ! धनं श्वः भवतः गृहम् एव प्रापयिष्यामि । श्वः प्रातः भवतः गृहस्य द्वारस्य पुरतः भविष्यति तत् । कृपया इदानीं श्राद्धकार्यं समापयतु'' इति ।

स च फनसफलस्य कालः । श्राद्धस्य अनन्तरं सः गृहस्य पृष्ठतः स्थितानि पनस-बीजानि सङ्गृह्य एकस्मिन् स्यूते स्थापितवान् । 'मया द्वारस्य समीपे एव स्थाप्यते इति उक्तम् । तथैव अवश्यं करिष्यते मया' इति स्वगतम् अवदत् सः ।






अनन्तरदिने उषसि एव पुरोहितस्य गृहं प्राप्य अङ्गणे सः बीजानाम् आरोपणम् आरब्धवान् । पङ्क्तिशः तेन बीजानि भूमौ आरोपितानि । पुरोहितस्य बहिरागमनम् एव प्रतीक्षमाणः स्थितवान् सः ।



द्वारम् उद्घाट्य बहिः आगतः पुरोहितः बीजारोपणार्थं कृतान् गर्तान् मृत्तिकया पूरयन्तं गोपालं पृष्टवान् - ''किम् एतत् क्रियते गोपाल ?'' इति ।



''परलोकं गतेन मम पित्रा कृतम् ऋणम् अवश्यं प्रत्यर्पयिष्यते मया इति प्रतिज्ञातं खलु आसीत् ? अतः मया पनसबीजानि आरोपितानि । तानि यदा वृक्षाः भविष्यन्ति तदा....''



तस्य वचनं मध्ये स्थगयन् अवदत् पुरोहितः - ''पनसबीजानि धनत्वेन न परिगण्यन्ते खलु ?'' इति । तदा गोपालः उक्तवान् - ''यदा एतानि वृक्षत्वं प्राप्स्यन्ति तदा एतेषां फलानि विक्रीय धनं प्राप्तुं शक्यते एव । मया उक्तम् आसीत् खलु - द्वारसमीपे स्थाप्यते इति, तदेव कृतं मया'' इति ।

बुद्धिमान् बीरबलः



राजा अकबरः प्रजानां हितार्थं बहूनि कार्याणि करोति स्म । कदाचित् तस्य मनसि प्रश्नः आगतः - 'मम प्रजासु कति जनाः निष्कपटाः स्युः ?' इति । कदाचित् सायङ्कालसमये आस्थानिकानां पुरतः सः एतं प्रश्नम् उपस्थापितवान् ।




''एतस्य ज्ञाने न महान् क्लेशः । 'निर्धनजनेभ्यः भोजनं दीयते । भोजनेच्छुना एकैकेनापि घटपरिमितं क्षीरम् आनेतव्यम्' इति घोषयतु'' इति अवदत् बीरबलः, यश्च स्वबुद्धिमत्तया ख्यातः आसीत् ।



''किन्तु तेन कः निष्कपटः, कश्च कपटः इति कथं ज्ञायते ?'' इति पृष्टवान् राजा । ''मया यथा उक्तं तथा आज्ञां करोतु । तदा भवतः प्रश्नस्य उत्तरं स्वयं प्राप्स्यते'' इति विश्वासपूर्वकम् उक्तवान् बीरबलः ।

राजा आज्ञां कारितवान् - ''अमुकदिने एकैकेनापि क्षीरघटः आनेतव्यः । प्रासादस्य प्रवेशात् पूर्वं द्वारसमीपे स्थापिते महापात्रे घटस्थं क्षीरं पातनीयं च'' इति ।





राज्ञा सूचितं दिनम् उपस्थितम् । जनाः घटम् आनीय पङ्क्तौ स्थितवन्तः । घटस्थं महापात्रे पातयित्वा प्रासादं प्रविष्टवन्तः च ।



अन्तिमः अपि यदा स्वपात्रस्थं महापात्रे पातितवान् तदा तस्य महापात्रस्य मुखम् आवरणेन पिहितम् । ततः तत् अकबरादीनां समीपम् आनीतं च ।



तदा बीरबलः राजानं साकूततया दृष्ट्वा भटान् आज्ञापितवान् - ''पात्रस्य आवरणम् अपनयन्तु'' इति । तेन सर्वैः पात्रस्थं द्रष्टुम् अवसरः प्राप्तः ।



''अहो जलम् !'' इति अत्याश्चर्येण अवदत् राजा । ''आं महाराज ! प्रजानां निष्कपटता कीदृशी इति अत्र स्फुटम् अस्ति'' इति अवदत् बीरबलः ।


बुद्धिमान् तेनालीरामः



तेनालीरामः प्रसिद्धिप्राप्तितः पूर्वं कृष्ण-देवरायस्य आस्थानं तदा तदा आगच्छति स्म । एवम् आगमनसमये मुख्यद्वारपालकः तत्सहायकः च केनचित् व्याजेन तस्य प्रवेशं निवारयितुं प्रयतेते स्म ।

कदाचित् राजा प्रसिद्धनर्तक्याः नृत्यं पश्यन् आसीत् । 'केनापि कारणेन नृत्यवीक्षणे विघ्नः न करणीयः' इति आज्ञापितवान् आसीत् सः । तेनालीरामः यथापूर्वम् आस्थानं प्रति गन्तुम् आगतवान् । मुख्यद्वाररक्षकः तस्य गमनं निवार्य तं हस्तेन नुत्त्वा पातितवान् ।






'किमपि न प्रवृत्तम्' इति भावं व्यवहारेण प्रदर्शयन् तेनालीरामः उत्थाय वस्त्रस्थां धूलिं निवार्य मुख्यद्वारपालकम् अवदत् - 'अहो भवतः शरीरसौष्ठवता ! एतदर्थं भवते पुरस्कारः दातव्यः' इति । 'भवादृशाः तु आस्थाने पुनः पुनः पुरस्कारं प्राप्नुवन्ति । मां को वा पश्येत् ?' इति अवदत् मुख्य-द्वारपालकः ।

'भोः, अलं चिन्तया । अन्तः प्रवेशाय मह्यम् अनुमतिं ददातु । अद्य राजा मह्यं यत् ददाति तस्य अर्धं भवते दास्यामि । भवतः सहायकाय एतस्मै अवशिष्टम् अर्धं दीयते' इति अवदत् तेनालीरामः । सन्तुष्टौ तौ तेनालीरामस्य प्रवेशाय अनुमतिं दत्तवन्तौ ।





तेनालीरामः आस्थानं प्रविश्य नृत्य-वेदिकाम् आरुह्य शीर्षासनं कृत्वा स्थितवान् । एतस्मात् नृत्यकार्यक्रमः झटिति स्थगितः । राजा क्रोधेन आज्ञापितवान् - ''कोऽयं मूर्खः सः ? सः आस्थानात् बहिः प्रेष्यताम्'' इति ।



रामः राजानं नमस्कृत्य अपृच्छत् - 'यथा कौशलं निमित्तीकृत्य नर्तकी पुरस्क्रियते तथा मम कौशलस्य अपि पुरस्कारः कुतः न क्रियते ?' इति । 'भवतः पुरस्कारः ? आं, पुरस्क्रियते भवान् यथायोग्यम्' इति उक्त्वा राजा भटं कञ्चित् आज्ञापयत् - ''शत-कशाप्रहारैः एतं पुरस्करोतु'' इति ।



''अनुगृहीतोऽस्मि महाराज ! किन्तु मया भवतः द्वारपालकाय तत्सहकारिणे च वचनं दत्तम् अस्ति यत् अद्य मया यत् प्राप्यते तस्य अर्धभागः उभाभ्यां दास्यते इति'' इति उक्त-वान् रामः । राजा किमपि न अवगतवान् । तदा तेनालीरामः प्रवृत्तं सर्वं विवृतवान् ।



राजा तौ द्वारपालकौ आनायितवान् । तेनालीरामस्य व्यवहारेण ताभ्यां यावत् प्राप्येत ततोऽपि अधिकैः कशाप्रहारैः तौ पुरस्कृतवान् सः । एतदनन्तरं कोऽपि तेनालीरामं द्वारे न अवरुणद्धि स्म ।


बुद्धिमान् गोपालबन्धुः



मोनीवर्यः कृष्णनगरे स्थितः कश्चन महाधनिकः । किन्तु सः स्वभावेन महाकृपणः । सः कदापि शिरसि तैलं न स्थापयति स्म । अतः सः विकीर्णकेशः भवति स्म सदापि । सः यां वेष्टीं धरति स्म सा प्रायः सप्ताहे एकवारं क्षाल्यते स्म । अतः सदा सः मलिनः दृश्यते स्म । कोऽपि तस्य मैत्रीं न इच्छति स्म ।




स च पर्वकालः । बालानां कश्चन गणः धनसाहाय्यार्थं मोनीसपीपं गतः । ''किं स्फोटकक्रयणाय धनम् इष्यते ? स्फोटकदाहेन धनं व्यर्थीक्रियते भवद्भिः । अतः किमपि न दीयते भवद्भ्यः । इतः निर्गम्यताम्'' इति क्रोधेन अवदत् मोनीवर्यः ।




ततः प्रत्यागच्छन्तः बालाः गोपालबन्धुना मिलिताः । ते मोनीगृहे प्रवृत्तं समग्रं तं निवेदितवन्तः । ''एतस्मिन् वसतिप्रदेशे वसन्तः सर्वेऽपि धनं दत्तवन्तः, ऋते मोनीवर्यात् । पञ्चाशत् रूप्यकाणि वा दद्यात् सः इति आशा आसीत् अस्माकम्'' इति उक्तवन्तः ते ।

''मोनीवर्यः महाकृपणः इति किं न जानन्ति भवन्तः ? तथापि अलं चिन्तया । अद्य सायम् आगच्छन्तु भवन्तः । तदा अहं मोनीवर्यात् शतं रूप्यकाणि दापयिष्यामि'' इति अवदत् गोपालबन्धुः । सः मोनीवर्यम् एतदवसरे योग्यां नीतिं बोधयितुम् इच्छति स्म ।






यदा सः तत्र गतः तदा मोनीवर्यः वाटिकायां शाकसङ्ग्रहणे निरतः आसीत् । गोपालस्य आगमनं दृष्ट्वा मोनीवर्यः अवदत् - ''मध्याह्नकाले मम उपवासः । रात्रौ एव मया शाकाः उपयुज्यन्ते'' इति । ''एतेन भवान् शाकसञ्चयं कुर्यात् । किन्तु अपरत्र भवता महत् धनं व्यर्थीक्रियते'' इति अवदत् गोपालः ।



''मया कुत्र धनं व्यर्थीक्रियते ?'' - आश्चर्येण पृष्टवान् मोनीवर्यः । ''रात्रौ अतिथिभिः सह सम्भाषणावसरे दीपस्य का अवश्यकता ?'' ''युक्तम् एतत् ! सम्भाषणावसरे परस्पर-दर्शनस्य आवश्यकता नास्ति ।'' ''एवमेव अन्धकारे वस्त्रधरणम् अपि व्यर्थम् एव । अन्धकारे को वा पश्येत् ?'' गोपालः अवदत् ।



''भवान् एकेन नेत्रेण द्रष्टुं किं न शक्नोति ?'' - गोपालः अपृच्छत् । ''शक्नोमि एव'' इति अवदत् मोनीवर्यः । ''एवं तर्हि उभयोः नेत्रयोः उपनेत्रधारणं व्यर्थं खलु ?'' इति अपृच्छत् गोपालः । 'व्यर्थाव्यर्थतां वदन् एषः किमपि ज्ञापयितुम् इच्छति' इति अवगतवान् मोनीवर्यः ।



''भवतः कथनस्य किं तात्पर्यम् ?' इति अपृच्छत् मोनीवर्यः । ''जीवने वयं यद्यत् कुर्मः तत्र सर्वत्र धनस्य व्यर्थता भवति । पर्वाचरणाय बालेभ्यः किञ्चित् दत्तं चेत् ते ततः सन्तोषम् अनुभवन्ति । अतः एतादृशं धनदानं न व्यर्थम्'' इति अवदत् गोपालः । इतः विवेकं प्राप्तवान् मोनीवर्यः बालेभ्यः शतं रूप्यकाणि दत्तवान् ।


वाग्विदग्धः तेनालिरामलिङ्गः



एकदा कृष्णदेवरायः चिन्ताक्रान्तः दृष्टः । मन्त्रिणः तस्य चिन्तायाः कारणं पृष्टवन्तः । तदा राजा दीर्घं निश्श्वस्य उक्तवान् - ''मम माता मरणसमये आम्रम् इष्टवती । स च कालः आम्राणां न आसीत् । अतः मम मातुः इच्छा न पूर्णा । इच्छापूर्तिम् अप्राप्य एव मम माता दिवं गता । महाराजः सन्नपि अहं मातुः एकां लघुम् इच्छां पूरयितुं न शक्तः यत् तत् मयि महान्तं खेदं जनयति'' इति ।



''प्रभो ! अल्पस्य एतस्य विषये किमर्थं महती चिन्ता ? सुवर्णेन पञ्च आम्राणि निर्माय पण्डितेभ्यः ददातु । एतेन स्वर्गीयमातुः इच्छा पूरिता भविष्यति । तस्याः आत्मा तृप्तः भविष्यति'' इति उक्तवन्तः पण्डिताः ।




एतेन राज्ञः मनसः चिन्ता अपगता । मातुः आत्मनः शान्त्यै पण्डितैः उक्तः उपायः योग्यः अस्ति इति तस्य मनसि अभासत । ततः पण्डितैः सूचिते शुभे दिने राजा पञ्च सुवर्णमयानि आम्राणि पण्डितेभ्यः दानरूपेण दत्तवान् । पण्डिताः तानि स्वीकृत्य राजानम् आशीर्वादेन अनुगृहीतवन्तः ।

तेनालिरामलिङ्गः सर्वं परिशीलयन् आसीत् । सर्वस्य समाप्तेः अनन्तरं सः पण्डितान् उक्तवान् - ''मम मातुः अपि काचित् इच्छा आसीत् । ताम् अहं पूरयितुं न शक्तः । इच्छापूर्तिम् अप्राप्य एव सा मरणं प्राप्तवती । अतः अग्रिमायाम् अमावास्यायां यदि भवन्तः मम गृहम् आगमिष्यन्ति तर्हि अहं दानं करिष्यामि, मम कर्तव्यं च निर्वक्ष्यामि'' इति ।






अमावास्यादिने पण्डिताः रामलिङ्गस्य गृहं गतवन्तः । रामलिङ्गः श्रद्धापूर्वकं मात्रे तर्पणादिकं समर्पितवान् । ततः पण्डितान् सः उक्तवान् - ''भवन्तः एकैकशः अन्तः आगच्छन्तु'' इति । एतदनुसारं पण्डिताः एकैकशः गृहस्य अन्तः गतवन्तः । प्रत्यागमनसमये ते एकं हस्तं वस्त्रेण आवृतवन्तः आसन् । एकैकस्यापि मुखं गम्भीरं वेदनामिश्रितं च आसीत् ।



ते ततः राज्ञः समीपं गतवन्तः । ते स्वस्य हस्तं राज्ञे प्रदर्श्य - ''एतस्य कारणं रामलिङ्गः । अतः एतदर्थं तं यथायोग्यं दण्डयतु'' इति प्रार्थितवन्तः ।



राजा रामलिङ्गम् आनायितवान् । आगतं तं दृष्ट्वा राजा क्रोधेन अपृच्छत् - ''पण्डितान् स्वगृहम् आहूतवान् भवान् । दानं क्रियते इति उक्तम् अपि आसीत् भवता । दानं तु न कृतं, प्रत्युत तप्तशलाकया तेषां हस्तस्य दाहः कृतः । किम् एतत् उचितम् ?'' इति ।



तदा रामलिङ्गः अवदत् - ''महाराज ! मम मातुः शरीरं पामरोगेण पीडितम् आसीत् । तप्तशलाकादाहेन स च रोगः अपगमिष्यति इति वैद्येन उक्तम् आसीत् । तां चिकित्साम् अप्राप्य एव सा दिवं गता । तस्याः इच्छायाः पूरणाय मया एवं कृतम् । यदि सुवर्णाम्रदानेन भवतः मातुः आत्मा तृप्तः स्यात् तर्हि तप्तशलाकादाहेन मम मातुः आत्मा किं तृप्तः न भवेत् ? तस्याः आत्मनः तृप्त्यै मया एवं कृतम्'' इति ।